छ) खारवेलस्य हाथीगुम्फाप्रशस्त्यां *भरधवस*-शब्दः किं बोधयति?

ज) कुशीनगरस्य प्राचीना अभिधा कासीत्? कस्मिन् महाजनपदे अस्या नगर्या अवस्थानमासीत्? अत्र बुद्धस्य परिनिर्वाणस्थानं कस्या नद्यास्तीरे वर्तते स्म?

२। अधोलिखितेषु **चत्वारः** प्रश्नाः समाधेयाः। 6×4=24

क) मगधस्य महाजनपदरूपेण अभ्युदयस्य भौगोलिक-कारणानि विशद्यन्ताम्।

ख) अभिलेखदृष्ट्या उत्तरभारतीयस्य दक्षिणभारतीयस्य च राजनीतिक-भौगोलिक-संस्थानस्य संतुलनात्मकम् आलोचनम् इष्यते।

ग) अशोकस्य गौणानुशासनानां भौगोलिकविस्तारं पुरस्कृत्य तेषाम् ऐतिहासिकमाहात्म्यं विचार्यताम्।

घ) प्राचीनभारतीयाकरेषु उपलब्धं हिमालयमाहात्म्यं समासत उपस्थाप्यताम्।

ङ) टिप्पणी कार्या–

अचिरवती, जेतवनम्, नालन्दा।

च) सिन्धोः उपनदीषु तिस्रो भौगोलिकदृष्ट्या प्राचीनाकरोल्लेखपुरः-सरम् आलोचनीयाः।

छ) भारतवर्षस्य सप्त कुलपर्वताः *मार्कण्डेयपुराण*-प्रोक्तं क्रममाश्रित्य नामत उल्लेख्याः। तत्र द्वितीयं तृतीयं सप्तमं चाधिकृत्य भौगोलिकी टीका कार्या।

ज) भारतवर्षस्य नव भेदान् आश्रित्य समासत आलोच्यताम्।

Ex/SANS/PG/4.4E/2023

# Master of Arts Examination, 2023

(2nd Year, 2nd Semester)

## SANSKRIT

## Course – XIX / E

**[ Physical and Historical Geography of Ancient India ]**

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१. अधोलिखितेषु **षट्** प्रश्नाः पूर्णवाक्यैः सुरगिरा देवनागरीं लिपिमाश्रित्य समाधेयाः। 1×6=6

क) सिद्धार्थः कुत्र जन्म लेभे? कस्या नद्यास्तीरे च सिद्धार्थेन प्रव्रज्या गृहीता?

ख) बौद्धधर्मप्रसङ्गे *इसिपतन-मिगदाय* इति स्थानं केन हेतुना विश्रुतं वर्तते?

ग) दक्षिणैशियायां कतिषु केषु च स्थानेषु अशोकराजस्य मुख्यशिलानुशासनानि प्राप्तानि?

घ) हेमचन्द्ररायचौधुरिमहोदयानां मतेन भारतवर्षस्य *भारतम्* इति अभिधा कस्माद् आगता?

ङ) षोडशमहाजनपदानामुल्लेखः येषु ग्रन्थेषु उपलभ्यते तेषु प्राचीनतमः कः? का नदी कोसलजनपदं द्विधा विभाजयति?

च) चैनिकग्रन्थेषु उपलब्धानि भारतवर्षस्य त्रीणि नामानि उल्लिख्यन्ताम् (केवलं नामानि रोमकलिप्या लेखनीयानि, शिष्टं वाक्यं तु सुरगिरा देवनागर्या)।